साधन पञ्चकम्

साधन पञ्चकम्

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्
तेनेशस्य विधीयताम् अपचिति: काम्ये मतिस्त्यज्यताम् ।
पापौघ: परिधूयतां भवसुखे दोषोनुसन्धीयताम्
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ।। १।।

सङ्ग: सत्सु विधीयतां भगवतो भक्तिर्दृढाधीयतां
शान्त्यादि: परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम् ।
सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादुकासेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरो वाक्यं समाकर्ण्यताम् ।। २।।

वाक्यार्थश्च विचार्यतां श्रुतिशिर:पक्ष:समाश्रीयतां
दुस्तर्कात् सुविरम्यतां श्रुतिमतस्तर्कोनुसन्धीयताम् ।
ब्रह्मैवास्मि विभाव्यतां अहरहर्गर्व: परित्यज्यतां
देहेहंमतिरुज्झ्यतां बुधजनै: वाद: परित्यज्यताम् ।। ३।।

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु याच्यतां विधिवशात् प्राप्तेन सन्तुष्यताम् ।
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यताम्
औदासीन्यमभीप्स्यतां जनकृपा नैष्ठुर्यमुत्सृज्यताम् ।। ४।।

एकान्ते सुखमास्यतां परतरे चेत: समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यतां ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरै: श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ।। ५।।